CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्रीदर्शनम्



लेखक :
बलदेवो जुजु :

ईसवीयवत्सर :
२००७
प्रकाशनम्
वैदिकप्रतिष्ठानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाल्मीकि विद्यापीठ
पुस्तकालयको लागि सादर
समर्पण - लेखक :

गायत्रीदर्शनम्

(अनुसन्धानात्मकम्)

लेखकः
बलदेवो जुजुः

ईसवीयवत्सरः
२०१७
प्रकाशिनम्
वैदिकप्रतिष्ठानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशनम् :- वैदिकप्रतिष्ठानस्य
मुद्रणसहयोगिनः :- स्वतनयाः
मुद्रितसंख्या :-
दिनाङ्कः :- २०६४ वैक्रमाब्दस्यापाढमासः
पुनः प्रकाशनाधिकारः :- लेखक एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समर्पणम्

अस्मान् प्रति सदा स्नेहार्द्रचित्तेषु
स्मृतिशेषं गतेषु शाम्भवानन्द-राजोपाध्यायेषु
पूज्यतातचरणेषु कृतिरेषा समर्प्यते सश्रद्धम् ।

बलदेवो जुजुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेखकस्य संक्षिप्तः परिचयः
स्वमुखादेव,

काष्ठमण्डपमहानगरान्तर्गत इन्द्रचोकाभिधेयस्थाने १९३६ ईसवीयवत्सरस्य जूनमासे नेपालदेशस्थराजोपाध्याय-कुले जन्माधिगतवानहं जुजूपनामको बलदेवो बाल्यकालादेव संस्कृतवाण्या अध्ययने संलग्नः सन् पञ्चदशाधिकवर्षाण्यु - त्तीर्य नव्यन्यायाचार्यपरीक्षायां समुत्तीर्णः संजातः । ततो नेपालदेशस्य त्रिभुवनविश्वविद्यालयान्तर्गते महाविद्यालये नेपालीभाषायाः साहित्यस्य च प्राध्यापनमेकत्रिंशद्वर्षाणि कुर्वन्निदानीमवकाशप्राप्तोऽहं वैदिक-प्रतिष्ठानाभिधेयायाः संस्थायाः संस्थापकाध्यक्षरूपेण कार्यरतः सन् वैदिकदर्शनस्य सगाम्भीर्यमध्ययनेऽनुसन्धाने च संलग्नः । तत्रापि पावनतम-गायत्रीमन्त्रस्य रहस्यस्यानुसन्धानपूर्वकमध्ययने दशवर्षाण्यु - त्तीर्य 'गायत्रीदर्शनम्' इति लघुकायं पुस्तकं रचितवान्, यदिदानीं विदुषां पुरतो दृश्यमानमस्ति । एतस्य मूल्याङ्कन - कर्तारो नीरक्षीरविवेकशीला विद्वांस एवेति मन्येऽहम् ।

लेखकः

अनुसन्धानकर्मणि
यथासंभवं निरतो लेखकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राक्कथनम्

सूक्ष्मातिसूक्ष्मरूपां वै कर्तृत्वेन तु सर्वगाम् ।
समस्तशक्तिरूपां च गायत्रीं चिन्तयाम्यहम् ॥

वेदाः प्रमाणमिति सूत्रोक्तिं मनसि विश्वस्तं संचिन्त्य वैदिकसंस्कृत्याः सरणिम- वलम्वमाना आध्यात्मिकदर्शनानुयायिनो विद्वांसो वेदमतिपवित्रं सर्वोत्कृष्टशास्त्रं मन्यन्ते । तथा वेदमपौरुषेयं तथा तपोधनानां मुनीनां धीषु स्वतः स्फुटितं च मन्यन्ते । अतो वेदान्तर्गतानां मन्त्राणां द्रष्टार ऋषय एवासन् । एवं च वेदस्य यावतीनामेव ऋचां पावनतममन्त्रत्व-मङ्गीकृत्य जपहवनपूजादिकर्मसु पठनं स्मरणं च विधीयते । व्यवहार ऋषिकालादारभ्येदानीन्तने समयेऽप्येषा रीतिः प्रवर्तितैव दृश्यते । तेष्वपि मन्त्रेषु गायत्रीमन्त्रः सर्वोच्चमन्त्रराजत्वेन मन्त्रधारिभिः श्रद्धया समाद्रियते । तथापि गायत्रीमन्त्रस्य व्यावहारिकजीवने सदुपयोगितायास्तथा मन्त्रान्त-र्निहितभावाशयानां च रहस्यात्मकत्वस्य च जिज्ञासाऽस्मद्धृदय उत्पद्यमाना सर्वदैव विद्यते । अतो जीवनसम्बन्धिन्या दार्शनिकदृष्ट्या मन्त्रस्य गाम्भीर्येणाध्ययनं सानुसन्धानं विधातुं दशवर्षावधि प्रयत्नो विहितः । इदानीं तत्प्रयत्नस्यैव परिणतिरूपैषा लघुकाया कृतिर्विदुषां सकाशे प्रस्तुता । एष प्रयत्नो विदुषां दृष्टिपटे कीदृशः प्रतिभाति, तज्ज्ञातुं समुत्सुकोऽयं लेखकः प्रतीक्षमाणः । अध्ययनानुसन्धानकर्मणि सदा प्रेरकत्वेन साहाय्यं विदधानस्य वैदिकप्रतिष्ठानस्य मित्रवर्गस्य योगदानं सदा स्मृतिपटेऽङ्कितं वर्तत एव । ततश्चातिगहनतमाया वेदवाण्याः प्रयोगे चाऽज्ञानवशात्संजातायां त्रुटौ सश्रमं साहाय्यप्रदात्रे तथाऽनुसन्धानकर्मण्यपि सहायिकायाः सामग्र्याश्चोपलब्ध्यर्थं सस्नेहं सहयोगविधात्रे मदीयगुरुकल्पायाग्रजाय श्रीगुरुशेखर-राजोपाध्यायाय सादरं सविशेषं साधुवादानर्पये । अन्यच्च, सर्वेभ्यो हितकाङ्क्षिभ्यश्च सहस्रवारं साधुवादाः स्वहृदयाग्रतः समर्प्यन्ते । अत्र चाज्ञानवशात्कुत्रचि-दशुद्धयादित्रुटयः संजाता यदि, तस्मिन्कृते मानवस्वभावविज्ञानां विदुषां पुरतो बद्धाञ्जलिः सन् क्षमां याचे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयानुक्रमणिका

		पृष्ठे
क)	गायत्रीमन्त्रजपानुष्ठानस्य महत्त्वम्	१
ख)	जीवनप्रकाशिनी गायत्री (प्रथमं पुष्पम्)	५
ग)	जगतः सृष्टिविधानस्य रहस्यम् (द्वितीयं पुष्पम्)	११
घ)	गायत्रीमन्त्रजपानुष्ठानस्य साभिप्रायो विधिः (तृतीयं पुष्पम्)	१८
ङ)	गायत्रीमन्त्रनिर्दिष्टं जीवनस्य लक्ष्यम् (चतुर्थं पुष्पम्)	२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्रीमन्त्रजपानुष्ठानस्य महत्त्वम्

वेदोल्लिखितो गायत्रीमन्त्रोऽतिपावन इति विदुषां मतम् । तदन्तर्गतानां शब्दानामर्थास्तथाऽर्थानां च तात्पर्यमतिगाम्भीर्ययुक्तं मननीयरहस्यवन्मन्यन्ते विवेचका विद्वांसः । गायत्रीमन्त्रस्य निःस्वरोच्चारणरीत्या श्रद्धाप्लावितमनसा जपविधानेन जपकर्तुः शरीरं हृच्च स्वच्छे संपत्स्येते, तथा जपानुष्ठातरि त्युच्चबोधक्षमता, कठिनकार्यसंपादनक्षमता, विषयसदुपयोगक्षमतेत्यादयो विविधदिव्यशक्तयश्चोत्पत्स्यन्ते । यथा, प्राचीना वननिलया मुनयो विधिपूर्वकं गायत्रीजपानुष्ठानसंपादनं विदधतस्त्रिकालदर्शिनः सन्तो विविधाः शक्तीः समधिगतवन्त इति श्रूयते । एतस्मिन् विषये गहनाध्ययनस्यावश्यकता वर्तत इति वयमनुभवामः ।

प्रथमं त्विदानीं गायत्रीमन्त्रोक्तमाराध्यदेवं परिचेतुं प्रयत्नो विधीयते । दीप्त्यर्थकाद् दिव्धातोर्व्युत्पन्नेन देवशब्देन बोध्याः सुराः सर्व एव सूर्यदेवस्य विविधप्रभावकारीणि ज्योतींषीति ज्ञायते, यतो विद्वद्भिः सूर्यस्य सर्वविधतेजसां स्रोतोरूपत्वं स्वीकृतम् । एवं चास्मदाधारभूतं भूमण्डलं च सूर्यादेव संचालितमित्यपि सर्वैरनुभूतमेव । ज्योतिर्विद्भिस्तु समस्तग्रहमण्डलमेव सूर्यस्यैवाधारमवलम्ब्य गतियुक्तं सद् निश्चितपन्थानमवलम्ब्याऽविरलं गगने परिभ्रमतीति मतं व्यक्तीकृतम् । गायत्रीमन्त्रेऽपि सूर्यस्य सर्वोत्कृष्टज्योतिष एवाराध्यत्वमुक्तं वयं विद्मः ।

सूर्यस्योत्पत्तिविषये वेदः,

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

शुक्लयजुर्वेदस्य पञ्चविंशतितमाध्यायस्य दशमी कण्डिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्यार्थश्च,

हिरण्यगर्भस्तेजःपुञ्जरूपः सूर्यः, भूतस्य पाञ्चभौतिकवस्तु-जाताद्, (अत्र पञ्चम्यर्थे षष्ठीविभक्तिः) अग्रे पूर्वम् , समवर्तत व्यक्तीभूतः । जातो व्यक्तः, एको द्वितीयरहितः सन्, पतिः स्वामी, आसीद् बभूव, स्वाधीनः संजात इति भावः । स सूर्यः इमां पृथिवीं भूमण्डलम्, द्यां दिवं तथाऽन्तरिक्षं च, (अन्तरिक्षं च वायुमण्डल-व्याप्तगगनभाग इत्याशयः) दाधार धारयामास । (स्वरन्त-रिक्षभुवामेक एवाधिष्ठाता संजात इत्याशयः) (अतः) कस्मै देवाय सूर्यातिरिक्ताय, हविषा विधेम पूजनविधानेन संमानमर्पयेम । (सूर्ये पूजिते सति समस्तदेवानामेव पूजनं स्वतो भवत्येवेति तात्पर्यम् ।)

वस्तुतस्तु सूर्यादेव प्रसृतानि सहस्रशस्तेजांस्येव विविध-शक्तिमतामिन्द्राग्निवरुणादीनां यावतां देवानां रूपाणीत्यङ्गीकृतम्, अतएव सूर्यस्यापरमभिधानं सहस्रांशुरित्युक्तं लोके ।

अन्यच्च, सूर्यः 'आदित्यः' इत्यपि नाम्ना स्तूयते । तदर्थश्चादितेः पुत्रः । अदितेर्विषये वेदः

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।

विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥

शुक्लयजुर्वेदस्य पञ्चविंशतितमाध्यायस्य त्रयोविंशतितमकण्डिका ।

अस्यार्थः,

द्यौर्दिव्याकाशम्, अन्तरिक्षं वायुमण्डलव्याप्तो गगनभागः, माता विश्वजननी पृथ्वी, (एतानि) अदितिरूपाणि । (तथा) पिता जनकः (कर्तेति भावः), पुत्र उत्पद्यमानः, (इत्यादयः) अदिति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपाः । (एवंच) विश्वेदेवाः समस्तदेवाः, पञ्चजनाः पाञ्चभौतिक-प्राणिनः, जातमुत्पन्नवस्तुजातम्, जनित्वमुत्पत्स्यमानं चादितिरूप-मेवेति ज्ञेयम् ।

अत्र चावखण्डनार्थकाद् दोधातोर्नञ्योगेन व्युत्पन्नस्यादिति-शब्दस्याखण्डनीयचरमसूक्ष्मतमविद्युत्परमाणुरूपार्थोऽवगम्यते । एतेन सूर्यादारभ्य समस्ता देवा अदितिपुत्रा एव, अतस्तेजोरूपा इति सुस्पष्टम् । एवं च तेजांसि यावन्ति सूर्यनिष्ठानीति विषयोऽपि वेदसंमतः । तदयथा,

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

स भूमिं सर्वतस्पृत्वाऽत्यतिष्ठद् दशाङ्गुलम् ॥

शुक्लयजुर्वेदस्य एकत्रिंशत्तमाध्यायस्य प्रथमकण्डिका,

अस्यार्थः

सूर्यस्य शिरसः (उर्ध्वभागादित्याशयः) सहस्रशो विविधतेजांसि प्रसरन्ति, अतः सूर्यः सहस्रशीर्षेति कथितः (तथैव) अक्ष्णः (मध्यभागादपि) सहस्रशो रश्मयः प्रसरन्ति, अतः सहस्राक्षश्च संजातः । (एवं) पादाद् (अधोभागाच्च) तथैव रश्मयः प्रसरन्तीति कारणात्सहस्रपादप्युक्तः । एतादृशः सूर्यः स्वदशाङ्गुलिपरिमाणेन तेजसा भूमिं व्याप्य स्थित इत्युक्तश्रुत्यंशेन स्पष्टीकृतम्, एतेन पृथिव्यतिरिक्तग्रहमण्डलादयोपि सूर्यतेजसा व्याप्ताः सन्तीति सूचितम् ।

अपरंच, सूर्यस्य महिमानं गायन् वेदः कथयति,

यो देवेभ्य आतपति यो देवानां पुरोहितः ।

पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥

शुक्लयजुर्वेदस्य एकत्रिंशत्तमाध्यायस्य विंशतितमकण्डिका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तात्पर्यं चास्य,

यः सूर्यः, देवेभ्य आतपति, (तापं प्रकाशं च ददातीत्याशयः)। तथा च सूर्यः सर्वेषामेव देवानामग्रगण्यो ज्येष्ठश्च। अत एतादृशः सूर्यः सदा नमनयोग्य उपास्यश्चेति।

इदानीं गायत्रीमन्त्रस्यास्माकं जीवनस्य च कः सम्बन्धः, तथाऽस्मदाधारभूतजगतो निर्मितिः कथम्, एवंच मन्त्रजपानुष्ठान-विधिश्च कीदृश इत्यादीनां क्रमेण पुष्पसंख्याविधिना प्रस्तुतिः क्रियते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीवनप्रकाशिनी गायत्री

(प्रथमं पुष्पम्)

मानवाः स्वावरजान् सच्चरित्रतायाः पाठं शिक्षयन्तः कर्तव्याकर्तव्यादीनि मानवोपयोगिज्ञानान्युपदिशन्ति, परं परोपदेशे पाण्डित्यमित्युक्तिमनुसरन्तः स्वयमेव तदुपदेशं जीवने नानुकुर्वन्ति । प्राचीनास्तपोनिरता मुनयः स्वशिष्यान् कामक्रोधादिदुर्गुणपरित्यागाय तथोदारचरित्रताया अवलम्बनायाऽनवरतं भूयो भूयो निर्दिशन्ति स्म, परं तूग्रतपसोऽपि मुनयः सुररमणीलावण्याकृष्टाः कुसुमशरदासत्वमङ्गीकृत्य भ्रष्टसरणिं स्वयमेव विहातुमसमर्था बभूवुः । तथा च केऽपि सदाचारनिरता ऋषयः कस्यापि क्षमायोग्यायामपि त्रुटौ क्रोधान्धतां समवलम्ब्य विवेकविरहितं निकृष्टशापवचनं भोगिगरलमिव प्रवमन्ति स्म । इत्थं सांसारिकलोभमोहादित्यागिनां मुनीनामेतादृश्यवस्था यदि संजाता तदा गृहस्थानां सामाजिकव्यवहाररतानां का वार्ता !

अस्मादृशानां गृहस्थानां कुले च तादृश्या भ्रष्टचरित्रताया विनिवारणार्थं यौवनद्वारं प्रविशतां कुलपुत्रपौत्रादीनामुपनयनसंस्कारस्य विधानं विधीयते । एषोऽस्माकं कुलधर्मरूपः कुलसंस्कार इत्युच्यते । तस्मिन्नवसरे कुलज्येष्ठः पुरुष एव कुलाचार्यो भूत्वा संस्कार्यबटुभ्यो गायत्रीमन्त्रश्रावणं विधिपूर्वकं विदधाति । तदनन्तरमपि नित्यं सन्ध्याजपादिसंपादनाय बटून् प्रेरयति च । परं गायत्रीमन्त्रान्तर्गतानां शब्दानामर्थानां च सामान्यज्ञानमपि न बोधयति । तथैव गायत्रीमन्त्रेण प्रदर्शितं जीवनस्य लक्ष्यं तथा तल्लक्ष्यप्राप्तयेऽनुसरणीयो मार्गश्च न कदापि व्याख्यातः । एतदस्माकं विवेकशून्यत्वमेव । अतएवात्र गायत्रीमन्त्रस्यास्माकं जीवने कीदृशः सम्बन्धो वर्तते, तथा च मन्त्रेण जीवनस्यानुसरणीयो मार्गः कथं सूचित इत्यपि यथामति प्रस्तूयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानवानां जीवितशरीरेषु पादाच्छिरःपर्यन्तं यच्चैतन्यं प्रसृतं वर्तते तच्च सूक्ष्मप्रकाशरूपं ज्योतिरिति बोद्धव्यं यद् वेदान्तदर्शनानुयायिभिर्ब्रह्मेति, सांख्याचार्यैः पुरुष इति तथा नैयायिकैः कर्तेत्युक्तम् । वेदान्तदर्शनशास्त्रे ब्रह्म ज्ञानरूपमिति, सांख्यशास्त्रे पुरुषः साक्षिरूप इति तथा न्यायदर्शने कर्ता ज्ञानाधिकरणमिति व्याख्यातम् । वस्तुतस्तु तैःसर्वैरपि दार्शनिकैर्ब्रह्मपुरुषकर्तृरूपं यन्मूलतत्त्वं निर्णीतं तच्च जीवनस्य पूर्वोक्तं चैतन्यमेव सूचितम् । एवं च गायत्रीमन्त्रान्तर्गतेन तदिति शब्देनापि तदेव चैतन्यमिङ्गितं बुध्यते । अनेन प्रसङ्गेन गायत्रीमन्त्रेऽस्माकं जीवनस्य मूलरहस्यमन्तर्निहितमिति विश्वस्तं बोद्धुं शक्यते । इदानीमत्र तस्यैव विषयस्य प्रबोधनार्थं गायत्रीमन्त्रान्तर्गतशब्दानां सविश्लेषणं व्याख्या विधीयते ।

अस्माकं जीवनस्य तिस्रोऽवस्थास्तिस्रो गतयश्च वर्तन्ते, तत्र प्रथमावस्थायाः प्रथमगतेश्च प्रतिपादकः शब्दो गायत्रीमन्त्रे भूरित्युक्तम् । अस्यायमभिप्रायः, पाञ्चभौतिकं शरीरं संगृह्य यदा जन्म लभ्यते तदा वयं भूमिष्ठाः । भूमिष्ठानां गतिस्त्वधःपतनं भवति । कदाचिद् भूम्या ऊर्ध्वं हठादुत्प्लवनेऽपि सद्यो भूमावेवाकृष्टाः पतनोन्मुखा भवेम । अतएव कथ्यते, भूमौ स्थितस्य पतनाद् भयमेव नास्तीति । एषावस्थैहिके लोके जीवितावस्थेति व्यवह्रियते ।

तदनन्तरं जीवनस्य द्वितीयाया अवस्थायाः गत्याश्च प्रतिपादकः शब्दो भुवरिति मन्त्रे जप्यते । अत्र भुवरित्यस्यान्तरिक्षमर्थः । अन्तरिक्षं च पृथिव्या बाह्ये स्थितो वायुमण्डलव्याप्तो गगनस्य भागो ज्ञातव्यः । एषा परिभाषाऽधुनिकवैज्ञानिकानां परिभाषातः पृथक् परिदृश्यते, तत्त्वन्यत्रैव विवेचनीयम् । अत्र तु 'नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः' इतिश्रुत्या वायुमण्डलव्यापि गगनमेवान्तरिक्षमिति स्पष्टमेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्याभिप्रायस्तु मानवस्य मृत्योः समये पाञ्चभौतिकशरीरात् पूर्वोक्तं शरीरव्यापि चैतन्यं वायवीयकलेवरं धारयन्निःसृत्यान्तरिक्षे वायुमण्डले इतस्ततस्तिर्यग्गत्या विचरति, यत् प्रेत इत्यभिधीयते । अतएवोक्तम् ।

अङ्गुष्ठमात्रः पुरुषो हाहा कुर्वन् कलेवरात् ।
तदैव गृह्यते याम्यैर्दूतैः पश्यन्स्वकं गृहम् ॥ गरुडपुराणे,

अत्राङ्गुष्ठमात्रः पुरुष इत्यस्याङ्गुष्ठपरिमाणकं वायवीयकलेवरं धारयच्चैतन्यमित्यर्थोऽवगमनीयः । तथैव याम्यैर्दूतैरित्यस्यापि मृत्योर्नियमैरित्युक्तमवगमनीयम् । अनेनेदं सूचितम्, जीवनस्य द्वितीया प्रेतावस्था तथा तिर्यग्गतिश्च भवति । प्रेतो वायवीयशरीरधारित्वाद् वस्तूनां स्पर्शं शब्दं चानुभवति, परं रूपरसगन्धानामनुभवं कर्तुमसमर्थो भवति, वायोः स्पर्शशब्द-गुणकत्वात् । अतः प्रेतावस्थापन्नो जीवो जनानां वस्तूनां च स्पर्शस्य शब्दस्य च साहाय्येनैव परिचयमवगच्छति, तथा सोऽन्तरिक्षचारी च भवति, अत्रोदाहरणार्थं श्रीमद्भागवतमाहात्म्यस्य प्रसङ्गः प्रस्तूयते,

सप्तग्रन्थियुतं तत्रापश्यत्कीचकमुच्छ्रितम् ।
तन्मूलच्छिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ ॥
वातरूपी स्थितिं कर्तुमशक्तो वंशमाविशत् ।
कृत्वापि द्वादशस्कन्धश्रवणं प्रेततां जहौ ॥

कथाश्रवणायागतो वायुरूपः प्रेतः स्थिरताप्राप्तये वंशविवरं प्रविशन् तत्रैव स्थिरो भूत्वा कथाश्रवणपुण्येन प्रेतत्वाच्च मुक्तिं लेभ इत्युपर्युल्लिखितप्रसङ्गस्य तात्पर्यम् । अनेन प्रेतस्य वायवीयशरीरित्वं सुस्पष्टमेव ।

एतदनन्तरं यदा सः प्रेतावस्थापन्नो जीवो वायवीयक-लेवरमपि परित्यक्तुं सफलो भवति तदा तच्चैतन्यं ज्योतिर्मात्र-रूपमवशिष्यते । तच्चोर्ध्वगतिमवलम्ब्य देवरूपं प्राप्नोति, गायत्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्रेण च स्वर्गितशब्देनेदं सूचितम् । एषा जीवनस्य तृतीयावस्था तथा गतिश्चोर्ध्वगमनम् । अत्र चैतन्यरूपं ज्योतिस्तापरहितं प्रकाशमात्रवद् भवतीति ज्ञातव्यम् । तापप्रकाशयुक्तं तेजस्तथा तापरहितं प्रकाशमात्रं ज्योतिरित्युच्यते ।

अत्राप्येको मननीयो विषयो वर्तते । पाञ्चभौतिकशरीरस्य त्यागः सुगम एव । रोगादिभिरनशनादिभिर्वा नरो मृत्युं प्राप्नोति । परं वायवीयकलेवरस्य त्यागस्त्वतीव दुष्कर एवेति शास्त्रज्ञानां मतं दृश्यते । विद्वांसः प्रेतावस्थातो मुक्तिरेव मानवैः साधनीयेति वारं वारमुपदिशन्ति जनेभ्यः । पुनश्च प्रेतावस्थायामवसादनमप्यति-कष्टकरमेवं भवति । अन्तरिक्षे ह्यादित्यकिरणस्य दूरतायास्तथा सामीप्यस्य कारणाद् वायुमण्डलस्य विविधा अवस्था जायन्ते । कदाचिद्धिमाच्छतगुणं शैत्यं तथा कदाचित्संतप्तायोगोलकस्पर्श-सन्निभस्तापश्चेत्यादिभिरसहनीयनारकीययातना बाध्यतया भुञ्ज-न्प्रेतो विविधपीडाभिभूतो दुःखायते । अतएव प्रेतत्वमुक्त्यर्थं शास्त्रकारादिभिर्मृत्युसंस्कारविधयः शास्त्रेषूपायरूपेण प्रदर्शिताः । इत्थं येन केनापि क्रियाविशेषेण प्रेतत्वान्मुक्तिं यदि साधयितुं समर्थो भवति प्रेतस्तदा देवावस्थां प्राप्यं स्वर्गमनावसरं लभते । स्वर्गस्तु स्वर्गमनमेव । अस्यायं भावः, वायुमण्डलव्याप्यन्तरिक्षस्य पारे यद् वृहद्दिव्याकाशं वर्तते तदेवात्र स्वरिति शब्देन प्रबोधितम् । ज्योतिष ऊर्ध्वगमनस्वभावत्वाज्ज्योतीरूपस्य चैतन्यस्यापि स्वर्गमनं भवति । एतेन जीवस्य तृतीयावस्था देवत्वं गतिश्चोर्ध्वगमनमिति सूचितम् । इत्थं गायत्रीमन्त्रान्तर्गतेन भूम्यन्तरिक्षादिव्याकाशबोधकेन शब्दत्रयेण जीवनस्य त्रिषु स्थानेषु भोग्यावस्थानां परिचयो विहितः । अत एव तासु तिसृष्वप्यवस्थासु शान्तिकामनया वेदे 'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरित्युक्तम् ।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्रीमन्त्रान्तर्गतमेतच्छब्दत्रयं व्याहृतिरित्युच्यते । व्याहृतिस्तु ब्रह्मघोष इति कथ्यते । ब्रह्मबोधको घोषो ब्रह्मघोष इति विग्रहात्पूर्वोक्तं चैतन्यरूपं ज्योतिरेवात्र ब्रह्मेति ज्ञायते ।

व्याहृतेरनन्तरं द्वितीयं पावनतमं वचनं 'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि' इति जप्यते । अत्र तच्छब्देन व्याहृत्यन्तर्गत-शब्दत्रयनिर्दिष्टं जीवनस्य मूलतत्त्वात्मकं ब्रह्मज्योतीरूपं चैतन्यमिङ्गितम्, यत्तु जीवनस्यावस्थात्रयभेदाज्जीवप्रेतदेवरूपं क्रमेण संजायते । तच्चैतन्यं देवस्य सवितुः सकाशान्निःसृत्य सूर्यकिरण एव विलीयते । अतएव तच्चैतन्यरूपं ज्योतिर्वरेण्यं भर्गो भवति । भर्गस्तु तेज एव, उक्तञ्च वाङ्मयार्णवे,

भर्गशब्दस्त्वदन्तः स्यात्सामभेदे महेश्वरे ।
भर्गस्तेजसि च क्लीबं सान्तं रेतस्यपीष्यते ॥

इति ।

अत्र मन्त्रे सर्वविधज्योतिषां मूलस्रोतोरूपस्य सूर्यस्य सार्थकविशेषणपदयोगेन परिचयात्मिका व्याख्याऽपि विहिता विद्यते । यथा, सूर्यः कीदृशः ? सविता, प्रसविता वोत्पादक इत्यर्थः । पुनः कीदृशः ? देवः, ज्योतिःपुञ्जरूपः सहस्रांशुरिति भावः । अयमाशयः, सूर्यस्य विविधप्रभावोत्पादकेष्वसंख्यकेषु किरणेषु वरेण्यं सर्वोत्कृष्टं भर्गो ज्योतिर्वयं ध्यायामेति मन्त्रान्तर्गतस्यैतद्वचनस्यार्थो बुध्यते । अत्रोत्तमपुरुषनिबन्धनद्वारा जीवनस्य मूलतत्त्वरूपस्य चैतन्यरूपस्य ब्रह्मज्योतिषस्तथाऽऽदित्यान्निःसृतसर्वोत्कृष्टज्योतिषश्चैक्यं भावयित्वा ध्यायद्भिरस्माभिर्जपो विधेय इति सूचितम् । अनया रीत्या ध्यानेन ध्यानकर्तृणां मनसि सत्प्रेरणा प्राप्यत इत्याशयो मन्त्रस्यावशिष्टवचनेन प्रकटीकृतः, यथा 'धियो यो नः प्रचोदयात्' इति ।

अत्र लिङ्गव्यत्ययस्यापि रहस्यं ज्ञातव्यमस्ति । प्रथमं पूर्ववाक्ये तज्ज्योतिर्नपुंसकलिङ्गि प्रयुक्तम् । यथा, 'तत् (द्)' वरेण्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भर्गः' इति । यदा तत्र प्रेरकत्वमुपजायते तदा पुंस्त्वं पर्यदृश्यत । सत्यं ज्ञानमनन्तं ब्रह्मेत्युक्तेर्नपुंसकलिङ्गं ब्रह्म सृष्टिकाले यथा ब्रह्मा पुरुषो जातः तथैवात्र मन्त्रेऽपि ध्यानकाले 'तत्' इति नपुंसकलिङ्गशब्दस्य प्रयोगे सत्यपि प्रेरणाकाले 'यः' इति पुल्लिङ्गस्य प्रयोगो विहितः । अत्र कतिपयैर्भाष्यकारैस्तु 'छान्दसो लिङ्गव्यत्ययः' इत्युक्त्वा मौनमेवावलम्बितम् ।

सारांशतः व्याहृतिनिर्दिष्टचैतन्यात्मकज्योतिषः सकलज्योतिषां मूलस्रोतोरूपस्य सूर्यस्य सर्वोत्कृष्टकिरणस्य चैक्यं चिन्तयन्तो ध्यायन्तो गायत्रीमन्त्रं जपन्तः साधका बौद्धिकप्रेरणां प्राप्य बोधक्षमतां कार्यसंपादनक्षमतां तथा विषयसदुपयोगक्षमतां च प्राप्नुवन्ति । एतान्विविधाः क्षमताः क्रमशो गायत्री सावित्री सरस्वतीति विद्वद्भिर्भाषितम् । गायत्रीमन्त्रस्यैतदाशयः परमरहस्ययुक्तोऽस्माभिः प्रयत्नतोऽवगमनीयः । अतएव गायत्रीमन्त्रधारिभिः प्रातर्मध्याह्ने सायं च क्रमेण सन्ध्यात्रयननिवार्यतया संपादनीयमिति नियमस्य पालनाय प्रेरिता वयम् । तथा च विद्वच्छिरोमणिभिर्व्यासवशिष्ठकपिलादिमुनिभिर्विविधपुराणदर्शनशास्त्रादिषु मानवजीवनयापनोपायान्स्वेहपरलोकसुधारकाणि दिव्यज्ञानानि च सोपपत्ति सदृष्टान्तं व्याख्यातानि, परं तेष्वपि ज्ञानसर्वस्वसारं सरहस्यं सप्रयोगविधि गायत्रीमन्त्रे सुनिहितं प्राप्तवन्तो वयम् । तथापि ज्ञानाकाङ्क्षिण इतस्ततो गवेषयन्तः परिभ्रमामः । स्वहस्तगतमपि ज्ञानरत्नमज्ञानवशाद् यत्र तत्र मृगयामहे वयम् । 'अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' । पुराणादिशास्त्राणि तु गायत्रीरहस्यबोधासमर्थेभ्य एवेति व्यवहारविदां शास्त्रकाराणामृषीणामाशयो जायते ।

'शं नस्पतु सूर्यः !'

इति प्रथमपुष्पमत्रैव पूर्णतां गतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जगतः सृष्टिविधानस्य रहस्यम्
(द्वितीयं पुष्पम्)

कयाऽप्यदृश्यया शक्त्या सृष्टेऽस्मिन् विश्वस्मिन् प्रकृतिविधानेनैव जन्माधिगतवन्तो वयं निरन्तरं यायावरा इव जीवनं यापयन्तो न कदापि विरमामः । किन्तु जीवनधारिणामस्माकं तत्र कतमल्लक्ष्यं कतमः सन्मार्गश्चेत्यपि निर्णेतुमसमर्थाश्च । लोके प्रायशो नरा निरुद्देश्यं सीमितोद्देश्यं वा परिभ्रमन्तः कदाचित्कालाहूता भौतिकरूपेणास्तित्वहीना विलयं यान्ति च ।

एतस्मिन् विषये केचिद् विचारका विद्वांसो जीवन्नान्तरस्याप्यस्तित्वं चिन्तयन्तस्तत्र शुभफलोदयकामनया ह्यधर्मभीरवः सन्तो विविधशास्त्रादिप्रदर्शितानि धार्मिककृत्यानि संपादयन्ति, तथाऽनयैव वृत्या चात्मनां सुजीवनं विधातुं निरन्तरं यतन्ते । परंतु केऽपि जीवनान्तरस्य कल्पना वास्तविकताहीनैवेति निश्चित्यैहिकसुखप्राप्त्यायेव ह्यहोरात्रं यतमानाः सुकर्मदुष्कर्मणोर्विवेकमपि परित्यज्य 'ऋणं कृत्वा धृतं पिबेदिति' गर्हिततनीतिमनुसरन्तः सदसन्मार्गविवेकसंमूढा दृश्यमानाः सन्ति ।

वयं तु ब्रह्मगायत्रीं धारयन्तस्तस्या जपविधानमेव जीवनस्य मूललक्ष्यं मन्यमानास्तत्कर्मण्येव रताः स्मः । एषा परंपराऽधुनाऽपि संचालितैव । परं दार्शनिका विद्वांसो जगतः सृष्टिविधानस्यार्थमविज्ञाय किमपि धार्मिककृत्यं विहितं पूर्णत्वयुक्तं न मन्यन्ते । अतएवेदानीं प्रस्तूयते जगन्नियन्तुर्जगत्सृजनाया गायत्रीमन्त्रोक्ता रहस्यमयी कथा । तद्यथा,

अस्मदाधारभूते दृश्यमान एतज्जगति जाताः पुरातनाः सर्व एव प्राणिनोऽत्रैव मृताश्च । इदानीमपि यावन्तो जीवन्तः सन्ति, तेऽपि मरिष्यन्त्यत्रैव । एवं चाधुनिकानि वस्तूनि यावन्ति च ध्वंसं यास्यन्तीति सुनिश्चितमेव । अतोऽस्माकमाधारभूतं भूमण्डलमपि कदाचिद् विनष्टतां यास्यत्येवेति याथार्थ्ययुक्तकारणादेतद्भूमण्ड-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लभ्यापरमभिधानं जगदिति कथ्यते । तथाप्येतज्जगतः सृष्टिः कया रीत्या संजातेति रहस्यावृतमेव तर्कयन्ति विवेकिनो जनाः । इदानीं गायत्रीमन्त्रस्य सूक्ष्मतयाऽध्ययनेनैव तद्रहस्यं ज्ञातुं प्रयतामहे वयम् ।

एतद्भूमण्डलस्य चरमखण्डरूपो यः सूक्ष्मतमः कणो वर्तते, स विद्युत्परमाणुरूपः सन्नपि सर्वव्यापी चिद्रूपोऽपरिमित-शक्त्याश्रयश्च भवति । आध्यात्मिकदर्शनानुयायिभिः कैश्चिद् ब्रह्मेति, कैश्चित्कर्तेति तथा कैश्चिन्मूलप्रकृतिरिति तन्मूलतत्त्वस्य व्याख्या विहिता । तत्र ब्रह्मवादिभिस्तन्मूलतत्त्वरूपं ब्रह्म ज्ञानरूपं चैतन्यरूपं वेत्युक्तम् । नैयायिकाश्च ज्ञानाधिकारणरूपः कर्तेति प्रोक्तवन्तः । प्रकृतिवादिनस्तु मूलप्रकृतिरेव तन्मूलतत्त्वमित्याशयं प्रकटयन्ति स्म । श्रुत्यनुसारेण च तन्मूलतत्त्वमदितिरिति कथ्यते । अदितिस्तु 'दो अवखण्डने' इत्यनुसारेणावखण्डनार्थकदोधातोः क्तिन्प्रत्ययययोगे दितिशब्दो व्युत्पद्यते, तस्मिन् नञ् योगे चादितिरिति संजायते । अनया व्युत्पत्त्याऽदितिरखण्ड-नीयेत्यर्थोऽवगम्यते । अतः,

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपिता स पुत्रः,
विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् । इत्येत-च्छ्रुत्यनुसारेण चादितिशब्दवोध्यं तन्मूलतत्त्वं सर्वव्यापीत्यपि ज्ञायते ।

वस्तुतस्तु ज्ञानात्मकस्य ब्रह्मणः कर्तृरूपस्येश्वरस्य तथा मूलप्रकृतिरूपाया अदितेश्च व्यवहारतः पृथक्त्वेऽपि तत्वत एकरूपत्वमेवेति गायत्रीमन्त्रेण निरूपितमवगम्यते । अत्रोदाहरणं प्रस्तूयते, यथा, सांसारिकव्यवहारवशादेक एव पुरुषः कदाचिद् गृहस्वामी, कदाचित्कार्यालयकर्मचारी तथा कुत्रचिच्च ज्ञानोपदेशकः शिक्षक इत्यादीनि विविधरूपाणि धारयन् दृश्यते, अपरं च, अपरिमितजलधिरूपत्वे सागरः, स्नानपानादिकर्मसु जलं तथा प्रवाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युक्तोदकरूपत्वे नदीति व्यवहारे जलस्य विविधनामानि प्रयुज्यन्ते, तथैव मूलतत्वात्मकस्य जगद्वीजरूपस्याऽप्यवस्थाभेदादेव नामभेदो लिङ्गभेदश्चाऽदृश्यत । गायत्रीमन्त्रे 'तत्' 'यः' 'धियः' इति त्रिभिः शब्दैस्तेषां त्रिविधलिङ्गैश्च ब्रह्मकर्तृप्रकृतीनामवस्थाभेदादेव भिन्नत्वव्यवहारो न तु वस्तुत इतीङ्गितम् । तच्चेत्थम् ,

गायत्रीमन्त्रस्य व्याहृत्यन्तर्गतेन 'भूर्भुवः स्वरि'त्यनेन भूम्यन्तरिक्षदिव्याकाशव्यापि ब्रह्मेति बुध्यते । अत एव व्याहृत्यनन्तरं 'तदि'ति नपुंसकलिङ्गी शब्दो मन्त्रे प्रयुक्तः, यथा 'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमही'ति । अत्र तच्छब्दबोध्यं 'ब्रह्म' देवस्य सवितुस्तेजःपुञ्जरूपस्य सूर्यस्य, वरेण्यं मूलतत्त्वात्मकमपरिमितशक्तियुतं 'भर्गः' विद्युत्परमाणुरूपमित्यर्थोऽवगम्यते । ततस्तदेव भर्गः 'धीमहि' निरन्तरं चिन्तनेन जानीमहीति भावः ।

अस्याभिप्रायस्तु तेजःपुञ्जरूपदेहस्य सूर्यस्योत्पत्तिस्तन्मूलतत्त्वात्मकाद्विद्युत्परमाणोरेव संजाता, अतस्तन्मूलतत्त्वं वरेण्यं भर्गो भवतीत्युक्तम् । तदनन्तरं 'धियो यो नः प्रचोदयादित्यत्र' 'यः' इति पुंल्लिङ्गिना शब्देन नपुंसकलिङ्गिनस्तदिति शब्दाद् बोध्यं ब्रह्मैव कर्तृरूपे परिवृत्य समस्तजगतां वीजभूतः स्वयमेव प्रेरकश्च भवतीति स्पष्टं भवति । एतेन तदिति शब्देनेङ्गितं ब्रह्म य इति शब्दाद् बोध्य ईश्वरश्चाभिन्न एवेति सिध्यति । तदनन्तरं 'धियः' इति स्त्रीलिङ्गी शब्दः कर्मणि द्वितीयाया बहुवचनान्तः प्रयुक्तः । अत्र धीशब्दः प्रकृतिबोधकः, महत्तत्त्वरूपाया बुद्धेर्मूलप्रकृत्या एव विकृतिरूपत्वात् । सांख्याचार्यैः 'प्रकृतेर्महान् ततोऽहंकारः' इत्यादिना महत्तत्त्वरूपाया बुद्धेः प्रकृत्या विकृतिरूपत्वं स्वीकृतं विद्यते । तथा च प्रकृत्यन्तर्हितानां विविधशक्तीनामसंख्येयत्वाद् 'धियः' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुवचनान्तत्वेन प्रयुक्तम् । विशेषतोऽत्र धिय इति शब्दाद् गायत्रीसावित्रीसरस्वतीप्रमुखा विविधशक्तयो बोद्धव्याः । एतत्प्राभिप्रायश्च ज्ञानरूपं चिद्रूपं वा ज्योतिः स्वयमेव प्रेरितं सच्छक्तिरूपासु धीष्वपि स्वत एव परिवर्तते, ततो विविधापरिमितशक्तिनिधानस्य विश्वस्य च सृष्टिः संजातेति । ☞

☜ अत्र विशेषः

भर्गः सान्तं पदं क्लीवलिङ्गे । तच्च गायत्रीमन्त्रे ..... धीमहीति क्रियापदस्य कर्मणि द्वितीयैकवचनान्तम् । भर्ग इति शब्दरूपं तु द्वितीयाविभक्त्येकवचनप्रत्ययस्य 'अमो' लोपे सति सकारस्य रुत्वानन्तरं विसर्गत्वेन व्युत्पन्नम् । अत्र भर्ग इत्यस्य नपुंसकलिङ्गत्वं निष्क्रियत्वार्थकं बोध्यम् । शब्दार्थश्च व्यवहाराप्रयोज्यं हृत्स्थं ज्ञानरूपं ज्योतिरेव । तज्ज्ञानं च ब्रह्मैव, सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः ।

तथा च प्रथमं तत्सवितुर्वरेण्यं भर्गः, इत्यत्र व्यवहाराप्रयोज्यत्वेन निष्क्रियज्ञानबोधकस्य 'तत्' इति नपुंसकलिङ्गस्य प्रयोगो विहितः । तदनन्तरं नपुंसकलिङ्गे तदेव भर्गः, निष्क्रियत्वं परित्यज्य सक्रियत्वार्थककर्तृत्वं दधत् पुंल्लिङ्गिरूपेण 'धियो यो नः प्रचोदयादि' त्यत्र यः इति प्रयुक्तः । एवं च धिय इति शब्दोऽपि विविधशक्तिरूपार्थं प्रबोधयन् स्त्रीलिङ्गित्वेन बहुवचनान्तत्वेन द्वितीयाविभक्तित्वेन च प्रयुक्तः । तत्र द्वितीयाविभक्तिस्तु प्रेरणीयत्वार्थिका ज्ञेयेति विवेचकाः प्राहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेन सर्वं ब्रह्ममयं जगदिति सिध्यति । तथा च गायत्र्या आराधनविधौ पठनीये पद्येऽप्युक्तम् – 'गायत्रि ! छन्दसां मातर्ब्रह्मयोने ! नमोस्तु ते' इति । तथैव सावित्री सरस्वत्योराराधनेऽपि पठ्यते । अतः शक्तिरूपिण्यो गायत्री-सावित्रीसरस्वत्यश्च ब्रह्मरुद्रविष्णुरूपिण्य एवेति स्पष्टं भवति, एवं च यथा गायत्रीसावित्रीसरस्वत्यो गायत्र्या एव रूपभेदस्याभिधानानि, तथैव ब्रह्मरुद्रविष्णवोऽपि ब्रह्मण एव रूपाणीत्यपि ज्ञेयम् । अत्र श्रीमद्भगवद्गीतायाश्चतुर्थाध्यायस्य प्रथमं पद्यं मननीयं वर्तते ।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥

अस्यार्थश्चेत्थम् –

इमं योगं योगज्ञानम्, अहमीश्वरः, विवस्वते सूर्याय, प्रोक्तवानिति । अत्र ज्ञानरूप एवेश्वरो योगज्ञानं प्रोक्तवानित्युक्तम् । ज्ञानं च सूक्ष्मज्योतीरूपं चैतन्यमेव, तथा सूर्योपि ज्योतिःपुञ्जरूप एव । एतेन मूलतत्त्वात्मकविद्युत्परमाणुरूपेश्वर एव बृहत्तेजो-रूपसूर्यत्वे स्वेच्छया परिणत इत्युक्तं बुध्यते । अतो व्यवहारे शास्त्रेषु च सूर्यस्य परब्रह्मत्वमङ्गीकृतम् । पुनश्चाखण्डनीयात्मकाया अदितेर्जातः सूर्य आदित्य इति च व्यवह्रियते ।

वस्तुतस्त्वादित्योत्पत्तिविषयकज्ञानमेव योगज्ञानमित्याशयः 'इमं विवस्वते योगं प्रोक्तवानि'ति पद्यांशस्य बोद्धव्यः । तदनन्तरं सूर्यस्योत्पतिः कथं बभूवेति विषये मननं कुर्वन् तस्य रहस्यस्य ज्ञाता मनुः कथितः । मननं करोति यः, मनुरिति विग्रहस्य संभवात् । विवस्वतो जातो मनुर्वैवस्वतो मनुः कथितः ।

जगतः सृष्टिपक्षेऽपि सूर्यस्योत्पत्तेरनन्तरं सूर्यकिरणस्य प्रतिक्रियातो भूमण्डलस्य तथा तत्र जलवाय्वादीनां चोत्पत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमशः संजाता । ततो विविधप्राणिनां तथा मानवानां च सृष्टिरपि वभूवेत्याशयो 'विवस्वान्मनवे प्राहे'त्यंशेन सूचितः, विवस्वतः सूर्याद् मननशीलो वैवस्वतो मनुर्यथा जातस्तथैव वैवस्वतान्मनोश्च ज्ञानेच्छुरिक्ष्वाकुः प्रथममनुजो वभूव । इक्ष्वाकुशब्दश्चेच्छाबोधकस्येषधातोर्व्युत्पन्नः, एवं चैतादृश्यैव रीत्या सृष्टिपरंपरा च प्रवर्तितेति पूर्वोक्तपद्यस्य भावो बुध्यते । अनेन विद्युत्परमाणुरूपचैतन्यात्मकमूलतत्त्वस्य, कर्तृरूपस्येश्वरस्य तथाऽदितिरूपायाः प्रकृतेरपि चैक्यं सिध्यति । सारांशतो ज्ञानमेवात्मा, आत्मैव परमात्मा कर्ता, कर्तैव च शक्तिस्तथा शक्तिरेव ज्ञानं चैतन्यं वेति ज्ञायते ।

गायत्रीमन्त्रे 'तत्, यः, धियः' इति त्रयाणां शब्दानां लिङ्गभेदोऽपि साभिप्रायः प्रयोगो ज्ञायते । प्रथमं, तदिति शब्देनपुंसकलिङ्गित्वं निष्क्रियत्वार्थबोधकमवगमनीयम् । ज्योतीरूपं ज्ञानं यदा स्वस्वरूप एव तिष्ठति तदा तच्चिन्मात्ररूपमप्रयुक्तरूपं भवति, यथाऽध्ययनकाले ज्ञानमप्रयुज्यं भवति, अत एव 'सत्यं ज्ञानमनन्तं ब्रह्मे' ति नपुंसकलिङ्गान्तत्वेन प्रयुक्तम् । ततश्च स्वस्वरूपेऽवस्थितं ज्योतिः स्वप्रेरितं च सत् कर्तृत्वमङ्गीकुर्वत् – पुंल्लिङ्गित्वे परिवृत्येश्वरो विश्वस्य कर्ता भुवनस्य गोप्ता चेति व्यवह्रियते । उक्तं च 'द्यावाभूमी जनयन्देव एको विश्वस्य कर्ता भुवनस्य गोप्ते' ति, अतएव सक्रियत्वबोधकः पुंल्लिङ्गी 'यः' इति शब्दो मन्त्रे प्रायुज्यत । पुनश्च 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः' इत्यनुसारेण जगतो निर्माणं प्रकृत्यैव संजातमित्यपि विद्वद्भिः स्वीकृतमेव, अतः प्रकृतिरपि ब्रह्मण ईश्वरस्य च रूपमिति स्पष्टं भवति । गायत्रीमन्त्रे च 'धियः' इति शब्दात्प्रकृतिरेवेङ्गिता । अत्र धीशब्दस्य स्त्रीलिङ्गित्वस्यार्थस्तु कार्यसंपादनसामर्थ्यवच्छक्तिरूपत्वं ज्ञातव्यम्, अतः 'तत्, यः, धियः' इति त्रिषु शब्देषु प्रयुक्तानां नपुंसकत्वपुंस्त्वस्त्रीत्वानां क्रमशोऽप्रयोज्यत्वं कर्तृत्वं शक्तिरूपत्वं चार्था बोद्धव्याः । एतेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतभाषाया विशिष्टलिङ्गानुशासनस्य प्रतिपादकत्वेन देववाणीत्वं सिध्यति ।

तेजोवोधकदिवधातोर्व्युत्पन्नाद् देवशब्दात्तदेव मूलतत्त्वात्मकविद्युत्परमाणुरेवार्थो वुध्यते, तथा संस्कृतभाषासम्बद्धव्याकरणान्तर्गतासु लिङ्गवचनव्यवस्थास्वपि तन्मूलतत्वस्य स्वरूपस्यैवाधारमङ्गीकृत्य वैयाकरणा नियमाः प्रयुक्ता वर्तन्ते । संस्कृतेतरभाषाणां तु वैयाकरणा नियमा व्यवहारमुखा एव प्रयुज्यन्ते, तथा संस्कृतेतरभाषाणां मन्त्रयोग्यत्वमपि न स्वीक्रियते व्यवहारे । मन्त्रो देववाणीवद्ध एव जप्यते लोके । संस्कृतवाण्या एतद्रहस्यमस्माभिः सदा मननीयम् । इति संक्षेपः ।

शं नो भवतु भुवनस्य यस्पतिः !

(अत्र शमित्यस्य कल्याणरूपमित्यर्थः)

द्वितीयपुष्पं चात्र पूर्णतां गतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्रीमन्त्रजपानुष्ठानस्य साभिप्रायो विधिः
(तृतीयं पुष्पम्)

ब्रह्मविद् ब्राह्मणो भवतीति प्रसिद्धमेव । जिज्ञासूनां बटूनां व्रतबन्धसंस्कारो यदा विधीयते तदाऽऽचार्यो मन्त्रमर्मज्ञो बटुभ्यो गायत्रीमन्त्रदानपुरःसरं मन्त्रनिर्दिष्टब्रह्मणो व्याख्यामपि सविस्तरं विदधाति, तथा ब्रह्मसाक्षात्कारश्च कया रीत्या संभवतीत्यपि शिक्षयति, तदनन्तरं गायत्रीजपानुष्ठानविधिं शिक्षयन् प्रातर्दिवा सायं च दिनानुदिनं सावधानतया त्रिसन्ध्यस्य क्रमेण संपादनाय निर्दिशति, यदनुष्ठाननैरन्तर्येण ते ब्रह्मसाक्षात्कारसमर्था भवन्ति ।

अत्रैकः सदा स्मरणीयो विषयो वर्तते । आचार्यो गायत्री-मन्त्रदानपूर्वं शिष्येभ्यः सर्वदा संसेव्यमानानामनुशासना-नामनुल्लङ्घ्यतायाः संरक्षणार्थं प्रतिज्ञां कारयति । तेष्वनुशासनेषु चैकोऽनुलङ्घ्यनियमो निःश्रद्धेभ्यो गायत्रीमन्त्रस्य गोपनीयतायाः सदा प्रतिपादनं वर्तते । अतएव कश्चिदपि पण्डिताभिमानी ब्राह्मणः पाण्डित्यप्रदर्शनप्रलोभनवशात् सार्वजनिकस्थान एव गायत्रीमन्त्रस्य सस्वरोच्चारणं विधाय मन्त्रान्तर्गतानां शब्दानां तथाऽक्षराणां चार्थान् वर्णयति, तदा तस्य तत्पाण्डित्यप्रदर्शनं नैष्ठिकताविरहितं निकृष्टं कर्म संजायते । प्राचीनाः प्रातःस्मरणीया मुनयो नैष्ठिकता-च्युतिभयादेवैकान्ते विपिन आश्रमं कल्पयित्वा गोप्यतायां पूर्णरूपेण विश्वस्ताः सन्तः श्रद्धावतामेव शिष्याणां पुरतो गायत्रीमन्त्रस्य तथा मन्त्रजपानुष्ठानविधेः सप्रयोगं शिक्षणं विदधति स्म । परं त्विदानीं वनेष्वाश्रमव्यवस्थापनमसंभवप्रायमेवेति संचिन्त्य कस्मिँश्चिदपि निवासभवने गोप्यतानुकूलकक्षं विधाय तत्रानधिकृतस्य कस्यचिदपि प्रवेशे प्रतिबन्धं व्यवस्थाप्य श्रद्धावतां शिष्याणामेव शिक्षणकार्यसंचालनं संभवत्येव । किन्तु यदा प्रयोगात्मिकायाः शिक्षाया आवश्यकता संजायते तदा नराणामावासाद् दूरे कस्मिँ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चिदप्युपयुक्ते वाह्यस्थाने पर्वतशिखरं शिष्यान्नीत्वा तेषामग्रे गायत्रीमन्त्रजपानुष्ठानविधेः प्रयोगः शिक्षणीयः । वस्तुतो ज्ञानं केवलं ज्ञानायैव न विचारणीयम्, अपि तु जीवने तज्ज्ञानस्य प्रयोगे - णोपलब्धिरपि विधेया । अन्यथा ज्ञानं वृथैव भवतीति बोद्धव्यम् ।

तदत्र ब्रह्मगायत्रीविषयमर्मज्ञा आचार्याः स्वशिष्यान् कथं शिक्षयन्तीति प्रस्तूयते । प्रथममुपदिशन्ति, "गायत्र्या अधिकारिणः श्रद्धावन्त एव भवन्ति तस्माच्छ्रद्धारहितसन्निधौ तद्विषयकवार्ता न प्रकाशनीयेत्येतदनुशासनं सावधानतया सदा संसेव्यम्" । तदनन्तरं पावनतमस्य ब्रह्मगायत्रीमन्त्रस्य सश्रद्धं श्रवणाय सावधानेभ्यः शिष्येभ्य उपदिशन्ति । तद्यथा, "*ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्*" ।

एष सर्वदा श्रद्धाप्लावितमनसि धारणीयो ब्रह्मरूपो गायत्रीमन्त्रः । अत्र प्रथमम् 'ॐ' इति प्रणवस्योच्चारणं क्रियते, मन्त्रस्य संमानार्थं नुतिरूपप्रणवस्य प्रयोगो विहितः । तदनन्तरम् 'भूः, भुवः, स्वः' इति ऋयःशब्दा ब्रह्मगायत्रीमन्त्रस्यारम्भभागस्थाः । अनेन भूम्यन्तरिक्षव्योमव्यापि सर्वगतं ब्रह्मेति तात्पर्यार्थोऽवगम्यते । उक्तं चः 'व्याहृतिर्ब्रह्मघोषः' इति । अत एव ब्रह्मगायत्रीमन्त्रस्या-ऽऽद्यभागस्थत्रिपदसमुदायेन ब्रह्म सत्यरूपं ज्ञानरूपमनन्तमित्युक्तं स्पष्टं भवति ।

व्याहृतेः पश्चादवशिष्टभागस्यार्थं शिष्याणामग्रे प्रस्तुवन्ति आचार्याः, देवस्य सवितुः सूर्यदेवस्य, तद्वरेण्यं भर्गः सर्वोत्कृष्टं तेजः, धीमहि वयं ध्यायाम, यः यत्किरणः (अत्र छान्दसो लिङ्व्यत्यय इति केषांचिद्वेदविदां मतम्) नोऽस्माकं, धियो बुद्धीः, प्रचोदयात् प्रेरयत्विति ।

अस्याभिप्राय इत्थमवगमनीयः, सूर्यस्य किरणाः सहस्रशोऽ - संख्येया वा वर्तन्ते, ते विविधप्रभावोत्पादका भवन्ति । कश्चिद् रोगनिवारकौषधरूपः, कश्चिन्पोषकस्तथा कश्चिद् ज्ञानोद्बोधक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चेत्यादयः । तेषु च सर्वोत्कृष्टं तेजो ज्ञानरूपमेव, यत् सत्यं ज्ञानमनन्तं ब्रह्मेत्यभिधीयते । गायत्रीमन्त्रे 'तद् वरेण्यं भर्गः' इत्यनेन तदेव ज्ञानरूपं तेज एव बुध्यते । तत्तेजसो ध्यानाद् ब्रह्मज्ञानस्य प्राप्तेः कामना मन्त्रे विहिताऽस्ति ।

गायत्रीमन्त्रधारिणः प्रतिदिनं प्रातःसन्ध्यां, मध्याह्नसन्ध्यां, सायंसन्ध्यां च क्रमेण नित्यं संपादयन्ति । तासु प्रातःसन्ध्यायां रक्तवर्णां बालां गायत्रीं, मध्याह्ने शुक्लवर्णां युवतिं सावित्रीं तथा सायं कृष्णवर्णां वृद्धां सरस्वतीं ध्यायन्ति । वस्तुतस्तु, तास्तिस्रो देव्यः सूर्यरश्मय एव । तासां ध्यानबोधकपद्येषु 'आयान्तीं सूर्यमण्डलादित्यु'क्तं वर्तते । तथा च पूर्वे शिखरे जाता गायत्री, उत्तरे शिखरे जाता सावित्री, एवं च पश्चिमे शिखरे जाता सरस्वतीत्यभिहितम् ।

प्रातः सूर्योदयकाल उदयाचलशिखरात् सूर्यबिम्बस्य सर्वोच्चभागस्थविन्दोर्यत्प्रथमो रश्मिः प्रसरति स एव गायत्रीरूपः किरणः, तत्किरणो बालरश्मी रक्तवर्णो ब्रह्मकिरण इत्यभिधीयते । अतस्तत्समयश्च ब्राह्ममुहूर्तः कथ्यते । ब्रह्मसाक्षात्कारस्य मुहूर्तो ब्राह्ममुहूर्त इति तस्य तात्पर्यम् ।

अतः प्रातः सूर्योदयात् प्रागेव स्नानकर्म समाप्योदयाचलाभिमुखो भूत्वाऽऽसनासीनः प्रातः सन्ध्यां संपादयन् तदन्तर्गत-प्राणायामन्यासादिकं विदधीत । तद्विधिश्चात्र प्रस्तूयते ।

न्यासस्य प्राणायामस्य च संपादनं येषां केषांचिदपि देवानामुपासनाकर्मणः प्रारम्भात्पूर्वमावश्यकं भवतीति नियमो वर्तते । अनयोः संपादनप्रभावादुपासकस्य शरीरं मनश्च नियन्त्रिते जायेते । मानवानां देहे तापशैत्यादिभिः काठिन्यादियुक्तवस्तुस्पर्शादिभिश्च मनस्यस्थिरत्वमुत्पद्यते, तथा ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च बाह्यवातावरणप्रभावाच्च चञ्चलतां यास्यन्ति । अतो न्यासविधेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणायामविधेश्चानिवार्यतया संपादनं विधेयमेवानुष्ठानकर्मणीति नियमः सर्वेषामनुमतः ।

प्रथमं न्यासविधिः प्रस्तूयते, न्यासो नाम शरीरमनसोरनुष्ठानकर्मणि समर्पणम् । तद्विधौ प्रथमं करादिन्यासो विधीयते, अस्योद्देश्यं तु शरीरावयवेषु कुत्रचिदपि कण्डूयनस्पर्शादिक्रियासु यावदनुष्ठानं स्वकरयोरप्रयोगः । तदनन्तरं हृदयादिन्यासः संपाद्यते । तस्योद्देश्यं च तथैव मनसः सस्थैर्यं संस्थापनं ज्ञेयम् । न्यासविधिस्तु श्रीमद्भगवद्गीतादिपुस्तकेषूपलभ्यते । अतोऽत्र प्राणायामविधिरेव प्रस्तूयते ।

प्राणायामो नाम पूरककुम्भकरेचकरीत्या श्वासप्रश्वासयो - र्नियन्त्रणपूर्वकं संचालनस्य विधिरुच्यते । एतद्विधिना जपध्यानादिकर्मसु चित्तैकाग्रतायाः संस्थापनं भवति, ततोऽनुष्ठानकर्मणि सफलताधिगमो भविता । अस्यायमाशयः, न्यासविधिसंपादनाद् वाह्यवातावरणस्य प्रभावादपसार्य शरीरेन्द्रिय-मनसामनुष्ठानकर्मणि समर्पणं विधीयते, ततः प्राणायाम विधानेन यावदनुष्ठानकालं तेषामैकाग्र्यं च स्थाप्यते । तदनन्तरमेवा-नुष्ठानकर्म प्रारभ्यत इति नियमः ।

प्राणायामविधिसंपादनेन च चित्तैकाग्रता कथं स्थाप्यत इत्यपि मननीयमस्ति । मानवानां शरीरस्य पृष्ठदेशे मेरुदण्डाभिधे - याऽस्थियष्टिर्वर्तते । सा च मूलाधारस्थानादारभ्य शिरोगोलकस्थान-पर्यन्तं संयुक्ता विद्यते । तस्मिन् मेरुदण्डेऽन्तस्तिस्रो नाड्यः (सर-णिरूपाणि छिद्राणि) वर्तन्त इति शास्त्रज्ञानां विदुषां मतमस्ति । तासु तिसृषु नाडीषु वामभागस्थितेडा, दक्षस्थिता पिङ्गला तथा मध्यस्थिता सुषुम्णेति योगशास्त्रेऽधीयते । एता नाडयः श्वासप्रश्वासयोः संचालनकर्मणि सम्बद्धाः स्वीक्रियन्ते विद्वद्भिः । यदा वामनासाच्छिद्रमार्गेण श्वासप्रश्वासयोः संचालनं भवति तदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इडानाडी प्रवलेति मन्यते, तथैव दक्षनासाच्छिद्रमार्गाच्छ्वास - प्रश्वासयोः संचालनकाले पिङ्गला प्रवलेति मन्यते । एवं चोभाभ्यां नासाच्छिद्राभ्यां समानरूपेण श्वासप्रश्वासौ संचाल्येते यदा, तदा सुषुम्णा प्रवला भवतीति स्वीक्रियते । योगशास्त्रानुसारेण सुषुम्णा नाड्याः प्रबलता मानसिकस्थैर्यायात्युपयोगिनीति मन्यते । अत एव सुषुम्णायाः प्रबलतास्थापनार्थं प्राणायामः क्रियते । तद्यथा,

प्रथमं दक्षहस्तस्याङ्गुष्ठाङ्गुल्या दक्षनासाविवरं पिधाय दशसंख्यागणनां विदधता श्वासमन्तः पूरयित्वा पूरकविधिः संपाद्यते । तदनन्तरमनामिकाङ्गुल्या वामनासाच्छिद्रं च पिधाय दशसंख्या गणनां कुर्वता श्वासकुम्भकविधिर्विधीयते । तत्पश्चादङ्गुष्ठाङ्गुली-मपसार्य दक्षनासांच्छिद्रमार्गात् प्रश्वासं बहिर्निःसार्य रेचकविधि-र्विधीयते एतद्विधिरेव प्राणायामः कथ्यते विद्वज्जनैः ।

इत्थं प्राणायामरीत्या वामनासाच्छिद्रात्प्रविष्टः श्वासः कुम्भकविधिना द्वयोर्नासाच्छिद्रयोर्मार्गं बाधारहितं संपाद्य प्रश्वासरूपेण दक्षनासाच्छिद्रपथा बहिर्याति । एतस्मिन् काले सुषुम्णा नाडी संचालिता भवति । ततः सुषुम्णाया एव साहाय्येन मनो मस्तिष्कप्रदेशे प्रविशत्सत् सुस्थिरं तिष्ठति । तदनन्तरं गायत्रीमन्त्रजपानुष्ठानकर्मैकतानतापूर्वकं प्रारभ्यते । तच्चेत्थम् ।

साधकः प्रथमं स्वनेत्रे संमील्य गायत्रीरूपरक्तवर्णं सूर्यकिरणं ललाटमध्ये ध्यात्वा ब्रह्मगायत्र्या जपमविरलं कुर्वीत, ततः सूर्योदयकाले, समुपस्थिते पूर्वोक्तरीत्यैव रक्तवर्णं धारयति सति उदिते सूर्यकिरणे तन्नवोदितकिरणस्य तथा ध्यानस्थकिरणस्य चैकरूपत्वात् स्वतएवाकृष्टो ब्रह्मकिरणो ललाटमार्गाज्जप-कर्तुर्मस्तिष्के प्रविशति । तदा तत्र ब्रह्मसाक्षात्कारः संजायते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनयैव रीत्या गायत्रीजपानुष्ठानं प्रकुर्वन्तः पुरातना ऋषयो ब्रह्मसाक्षात्कारं समधिगम्य त्रिकालदर्शिनो ब्रह्मर्षयः संजाता इति शुश्रुमः । अधुनाऽस्माभिरपि पूर्वोक्तविधिं समवलम्ब्य गायत्रीमन्त्र-जपानुष्ठानं कुर्वद्भिर्ब्रह्मसाक्षात्कारप्राप्त्यै प्रयत्नो विधेयः । ततो ब्रह्मसाक्षात्कारपरिणत्या वयं ब्रह्मज्ञानिनो भवेम ।

एवं मध्याह्ने वियन्मध्यगतसूर्यबिम्बस्य मध्यभागस्थ-विन्दोर्यत्किरणः प्रसृतोऽस्ति स शुक्लवर्णो युवतिसावित्रीरूपः । मध्याह्नसमय उत्तराभिमुखो भूत्वा मध्याह्नसंध्यां संपादयन् तमेव शुक्लवर्णसावित्रीकिरणं स्वललाटमध्ये ध्यायञ्जपानुष्ठानकर्ता विविधोत्पादनशीलः कार्यकुशलः संजायते । तथा सायं च सूर्यास्तमयसमये क्रमेणास्तं गच्छतः सूर्यस्य पूर्णास्तमयसमयपूर्वं यत्सूक्ष्मज्योतिर्भागोऽस्ताचलशिखरेऽवशिष्टो दृश्यते, तस्मात्प्रसृतः किरणः कृष्णवर्णो वृद्धसरस्वतीरूपः । दिनान्ते पश्चिमाभिमुखःसन् सूर्यास्तसमयपूर्वमेव सायंसन्ध्यां संपादयन् तमेव सरस्वतीरूपं कृष्णवर्णादित्यकिरणं स्वललाटमध्ये ध्यायन् कर्ता परिपक्वगाम्भी-र्ययुक्तबौद्धिकतायाः स्वामी भवति ।

पुनश्च, सूर्यग्रहणकाले सूर्यबिम्बस्य ग्रहणवशात् स्पर्शकालादारभ्य क्रमशः केचित् किरणाः पिहिताः केचिदपिहिताः सन्तो मिश्रिता अमिश्रिता भवन्ति । ततस्तत्किरणेभ्यो विविधप्रभावा विनिःसरन्ति पृथिव्याम् । अन्यसमये सूर्यस्य समस्तकिरणानां संमिश्रणेन तेभ्यो निःसृतः प्रभावोपि मिश्रित एव भवति । अतः सूर्योपरागसमये स्पर्शकालादेव मोक्षकालपर्यन्तं विश्रामरहितं गायत्रीजपानुष्ठानं विधिपूर्णं संपादयन् कर्ता तत्तत्किरणेभ्यो निःसृतानि विविधफलानि प्राप्नोति । इत्थं संचिन्त्य ज्ञानिन उपरागसमयेऽपि स्नानसन्ध्याजपाद्यनुष्ठानानि सश्रद्धं विदधतीति दिक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पावको अस्मभ्यं गूं (अस्मभ्यम्) शिवो भव !
(अत्र 'पावकः' पावनकर्ता सूर्य इत्याशयः) ।

तृतीयं पुष्पं च पूर्णतां गतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्रीमन्त्रनिर्दिष्टं जीवनस्य लक्ष्यम्
(चतुर्थं पुष्पम्)

अस्माकं जीवने प्रयुक्तानां यावतां वस्तूनां क्षयोन्मुखतां वयं सर्वत्र पश्यामः । अतः 'सर्वमुत्पादि भङ्गुरम्' इत्युक्तेर्ध्रुवसत्यता स्वीकृताः सर्वैः । एवं च "जातस्य हि ध्रुवो मृत्युः" इत्युक्तिरपि सर्वत्र दृष्टार्थैव । यथा महान्तो धर्मधुरन्धराः पुरुषास्तथा सदा समरविजयिनो दुष्टसंहारका वीराश्चाऽनिवार्यतया मृत्युकवलिता दृष्टाः । इदानीं च कति प्राणिनो विविधव्याधिपीडिताः सन्तो मृत्युसन्निकटे प्राप्ता दृश्यन्ते । तथा च कतिचित्स्वस्था अपि नरा दिनानुदिनं वार्द्धक्यं यास्यन्तः सन्त्येव, अत एव मृत्युमतिक्रमितुं न कोऽपि समर्थ इति जीवनरहस्यस्य बोद्धारो विद्वांसो मुहुर्मुहुः प्रवदन्ति । तथापि मृत्योः पाशान्मुक्त्यर्थं बलवत्याशाऽस्मद्धृदय उत्पद्यमाना सर्वदा बोभूयते ।

मनुष्याणां जिजीविषाऽपि न कदापि निरस्ता । कदाचित् कस्यापि व्याधेराक्रमणे संजाते च मृत्युसान्निकट्यभयान्नरो व्याधिनिदानकुशलानां चिकित्सकानामन्तिके त्वरया प्राप्नोति, तथा रोगोपचारक्रिया प्रारभ्यते च, परंतु कतिचिद् वारं रोगनिवारणकर्मणि सफलताऽधिगमेऽपि कदाचित् पुनः केनापि प्राणधातकेन रोगेण पीडितः सन् मृत्युं यास्यत्येव सः । प्राणिनो मृत्योरवश्यम्भाविता नाऽद्यापि विफलीभूताऽदृश्यतं । अत एव मरणशीलं जीवनं समधिगम्य मानवैः कीदृशं लक्ष्यमनुगन्तुं प्रयतितव्यमिति ज्ञानप्राप्तिर्जीवन आवश्यक्येव ।

एतस्मिन् प्रसङ्गे व्यासवशिष्ठादयो दर्शनशास्त्रप्रवर्तका मुनयस्तु जनेभ्यो मोक्षप्राप्त्या एव यत्नं विधातुं निर्दिशन्ति स्म । मोक्षस्तु "अहं ब्रह्मास्मीति" धारणायां स्थिरबुद्धेः प्राप्तिरेवेति तेषां विचारः । परं पुराणादिषु तु पवित्रधार्मिककृत्यादिभिः स्वर्गप्राप्तिरेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रशस्येति सोदाहरणं वर्णितं वयं प्राप्नुमः । स्वर्गश्चाभिलाषोपनीत-सुखमेवेति निगद्यते । यथा

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥

इति ।

अत्र चैको मननीयो विषयो वर्तते, व्यासवशिष्ठौ महर्षी परोपदेशसमये सर्वत्र संसारस्याऽसारतां प्रतिपादयन्तौ मुक्तिमार्गस्यैवोत्कृष्टतां व्याजहृतुः । व्यासो वेदान्तदर्शनस्य प्रवर्तकस्तथाऽष्टादशमहापुराणानां च प्रणेताऽऽसीत् । वशिष्ठोऽपि योगवाशिष्ठनामकस्य परमार्थतत्त्वबोधकस्य ग्रन्थस्य कर्ताऽभूत् । उभावपि मोक्षमार्गाऽनुसरन्तौ न कदाप्यदृश्येताम् । व्यासः केनाप्युपायेन मृत्युं जित्वा चिरञ्जीविपंक्तौ स्थितवानिति शुश्रुम । वशिष्ठः सर्वेषामपि सूर्यवंशिनां राज्ञां बहुसहस्रवर्षपर्यन्तं कुलगुरुर्भूत्वा स्वशिष्येभ्यो राजभ्यश्चक्रवर्तित्वं साधयितुं यतमानो बभूवेति पुराणेषु वर्णितं पठामः । अतस्तौ ब्रह्मज्ञानिनौ महर्षिमहोदयौ मोक्षमार्गाऽनुसरणं परित्यज्य चिरञ्जीवित्व-मेवाङ्गीकृतवन्तौ, न तु मुक्तिं प्रति कदापि लालायितौ पर्यदृश्येताम् । अनेन मृत्योरवश्यम्भाविता न सर्वत्रेति सिद्धं भवति ।

अतो वयं ब्रूमः । पारमार्थिकदृष्ट्या नराणामभिलाषानुकूलं जीवनस्य लक्ष्यं त्रितयं दृश्यते, स्वर्गप्राप्तिर्मोक्षप्राप्तिश्च-रञ्जीवित्वप्राप्तिश्च । एतासु स्वेच्छयैकमनुगन्तुं मानवः प्रयत्नरतो भवेत् ।

यो विविधदानयज्ञोपासनादीनि धार्मिककृत्यानि सश्रद्धं सश्रमं संपादयति, स जीवनान्तरे स्वर्गलोकं प्राप्याऽपरिमितसुखं समधिगमिष्यतीति पुराणधर्मशास्त्रादीनां मतमस्ति । तथा श्रुता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वप्युक्तं "यजेत स्वर्गकामः" इति । एतत्प्रथमं जीवनान्तर-लक्ष्यम् ।

ततो यो नरो धार्मिकसामाजिक व्यावहारिकादि-समस्तकार्याणि सर्वदा निष्कामभावनया संपादयन् स्वजीवनं यापयति, तथा कामक्रोधलोभमोहेर्ष्याद्वेषादिदूषितचरितानि च पूर्णतया परित्यज्य परब्रह्मणि स्थिरचित्तो भवति स जीवनान्तरे पुनर्जन्ममृत्युविरहितं मोक्षं प्राप्नोति ।

एष आध्यात्मिकदर्शनशास्त्रिणां सिद्धान्तस्तथा गीताद्युपनिषत्सु च संमतः । एतद् द्वितीयं जीवनान्तरलक्ष्यम् ।

तृतीयं लक्ष्यं तु चिरञ्जीवित्वम् । एतल्लक्ष्यप्राप्ताविहैव जीवने मृत्योर्वशान्मुक्तिर्लभ्यते । यो नित्यमेव सन्ध्याजपयज्ञतपःसु स्वशरीरं कर्शयन् सकलप्राणिजनानां चिरकल्याणं मनसा चिन्तयन् वाचा परेभ्यः सदुपदेशं शिक्षयन् जीवनयात्रां संचालयति, स मृत्युमपि विजित्य सुदीर्घकालं चिरं जीवति । एतत्तृतीय-लक्ष्यप्राप्तिस्तु तपसैव संभवति ।

तपस्तु गायत्र्युपासनाऽध्ययनमननजपादिविषयकमेवेति बुध्यते । तथा मुनय एकान्ते विपिने स्थित्वा वाह्याभ्यन्तरेन्द्रियाणि संयम्य क्षुत्पिपासाद्यनुभवमप्यविगणय्य स्थिरचित्ताः स्थिरासनाः सन्तस्तन्मयतया गायत्र्यादिमन्त्रमविरलं जपन्ति स्म । तत्कर्मैव तपः कथ्यते । एतादृशानि तपांसि संपादयन्तः सुरा असुराश्च विविधाऽपौरुषेयाः शक्तीर्लेभ इति पुराणेषूपलभ्यते । श्रुतावपि मृत्युञ्जयत्वप्राप्तिविषये सूचितं लभ्यते । यथा रुद्राध्यायस्य पुरुषसूक्तौ -

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्यार्थश्च -

एतं पुरोवर्तिनम् , महान्तमादित्यवर्णं सूर्यरूपम्, पुरुषं चैतन्यात्मकम्, अहं वेद जानामि । तमेव विदित्वा मृत्युमत्येति मृत्योर्वशान्मुक्तिं यास्यतीत्याशयः । अन्यः पन्या अयनाय गतये मृत्योर्वशान्मुक्तये न विद्यते ।

अयमाशयः, प्राणिनामायुषो गणना सूर्यगतिमनुसृत्यैव भवति । अतः सूर्यगतेः प्रभावादेव प्राणिषु बालयौवन-वार्धक्याद्युत्पद्यते । यदि कदाचित् सूर्यगतेः प्रभावाद् दूरे स्थातुं शक्नोति, तदा प्राणी वार्धक्यादिजीवनावस्थादिरहितः सन् मृत्योर्वशादपि मुक्तिं लब्धुं समर्थो भवतीति गूढार्थोऽत्र बुध्यते । यथा सूर्यतापप्रभावहीनं स्थानं वैज्ञानिकयुक्त्या व्यवस्थाप्य तत्र फलादीनां स्थापनेन कतिचिद् दिनपर्यन्तं तानि फलानि विनष्टतां न यास्यन्तीत्याधुनिकव्यवहारे प्रसिद्ध एवानुभवः । अतोऽत्र मृत्योरतिक्रमणोपायस्य विद्यमानत्वमिङ्गितं विद्मः ।

इदानीं गायत्रीमन्त्रोल्लिखितनिर्देशनवचनस्य सविस्तरं विश्लेषणं विधास्यामः ।

गायत्रीमन्त्रधारिभिस्त्रिकालसंध्याकर्मणि नित्यं जपनीये गायत्रीमन्त्रे निर्देशनद्वयं जपकर्तृभ्यो मननायोल्लिखितं जानीमः । तत्र प्रथमं निर्देशनं सवितुः सकाशाद् विनिःसृतस्योत्कृष्टस्य भर्गसो (तेजसः) ध्यानमुत्तमपुरुषवाक्यात्मकवचनेनाभिव्यक्तम् । ततस्तदेव भर्गो जपकर्तुर्धियः प्रेरयत्विति कामना द्वितीयनिर्देशन-वचनरूपेणाभिव्यक्ता ।

अत्र प्रथमनिर्देशनवाक्यान्तर्गतः सार्वनामिकविशेषणरूप-स्तच्छब्दोऽतिगूढतररहस्ययुक्तो भावगर्भो बुध्यते । सूर्यसका-शात्प्रसृतेषु विविधप्रभावोत्पादकेषु किरणेषु जपकर्तुर्यदभिलषितं तदेवोत्कृष्टं भर्गो ध्यातव्यमित्याशयोऽभिव्यज्यते । यथा प्रातः-सन्ध्यायां रक्तवर्णा बाला गायत्री ह्युत्कृष्टभर्गोरूपा ध्याने चिन्त्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो मध्यान्हसन्ध्यायां शुल्कवर्णा युवतिसावित्री चिन्त्यते । तथा च सायंसन्ध्यायां कृष्णवर्णा वृद्धा सरस्वती चिन्त्यते । अतो मन्त्रान्तर्गततच्छब्दात् प्रातःसन्ध्यायां गायत्रीरूपं मध्यान्ह-सन्ध्यायां सावित्रीरूपं तथा सायंसन्ध्यायां सरस्वतीरूपं भर्ग इति बोद्धव्यम् । तथैवान्यविविधशक्तिरूपाणां देवीनां वा देवानां च तद्भर्गोरूपं गायत्रीजपविधौ ध्यातुं शक्नुमो वयम् । अत एव विद्वद्भिः कथ्यते, गायत्रीमन्त्रोच्चारणेन यावद्देवीदेवानां जपो ध्यानं स्तोत्रं पूजनं हवनं च विधीयन्ते इति ।

अनयैव रीत्या यो दीर्घजीवित्वकामः साधकः स्वकीये जीवनेऽजरत्वामरत्वादिप्रतिष्ठापकं तद् वरेण्यं भर्गो मनसा संचिन्त्याऽविरलं गायत्रीजपरूपं तपो विदधाति, स सदा स्वस्थो युवा मृत्युजिच्च संजायत इति बुध्यते । अतोऽत्र तच्छब्दादजरत्वाऽमरत्वप्रतिपादकत्वं बोद्धव्यम् ।

किन्तु तद् भर्गसो वर्णः स्वरूपं च कीदृशमित्यत्र परिचयो नोक्तः कुत्रापि । यथा गायत्रीध्यानपद्ये गायत्रीरूपस्य भर्गसो रक्तवर्णत्वं बालत्वं चोक्तम् । तथाऽस्मिन् किमपि नोक्तम् ।

तथापि पुरुषसूक्तान्तर्गतायां पूर्वोक्तायां सूक्तौ तत्किरणस्य संक्षेपेणोल्लेखः प्राप्यते । तद्यथा :–

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।

अत्रैतं पुरुषमित्यस्य मूलपुरुषात्मकत्वमर्थः । तथा महान्तमादित्यवर्णमित्यस्य च वृहत्तेजःपुञ्जरूपं सूर्यमण्डलमित्यर्थोऽवगमनीयः । ततस्तद्विशालतेजोमण्डलरूपं सूर्यमेवान्तर्हृदि ध्यानगतं विधायाऽनवच्छिन्ननैरन्तर्येण गायत्रीमन्त्रजपानुष्ठानरूपतपसैव पूर्वोक्तफलप्राप्तिर्भवितेति भाव उक्तसूक्तस्येति ।

अयं गूढाशयः, सूर्यस्योदयात्प्रारब्धस्य दिनोदयस्य सतः सूर्यापसरणक्रिययैव मध्यन्दिनस्य तथा दिनान्तरूपसमयस्य च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमशो विद्यमानत्वमनुभूयते, तथापि यदि कोऽपि जनः समयबन्धनान्मुक्तिकामोऽमरत्वप्राप्तिसिद्ध्यर्थं प्रातर्दिवा रात्रावपि प्रज्वलितमिव दीप्तिमन्तं भास्करं हृदि स्थिररूपेण संचिन्त्य तत्र तमसः सूक्ष्मातिसूक्ष्मस्यांशस्याप्यसत्त्वं परिकल्प्यैकतानतया गायत्रीमन्त्रजपरूपं तपो विदधात्येति, एतदेवाशयं प्रकटय-त्युक्तसूक्तिः, अतस्तत्रोक्तम् , महान्तम् , आदित्यवर्णम् , तथा तमसः परस्तादिति ।

एतद् गायत्रीमन्त्रस्य रहस्यमस्माभिः सर्वदा मननीयमेव । परंतु तपसः प्राप्तायाः शक्त्या दुरुपयोगे तु भयावह-दुष्परिणामस्योत्पत्तेः संभवो न कदापि विस्मर्तव्यः । यथा हिरण्यकशिपुमहिषासुरादयस्तादृशेनैव तपसा विशिष्टशक्तीः समधिगम्य तच्छक्तीनां दुरुपयोगं विदधतो जनकष्टकारकाणि दुष्कर्माणि विदधुरिति पुराणेषु वर्णितं वयं विद्मः । इति दिक् ।

अहानि शं भवन्तु नः शग्ं रात्रीः प्रतिधीयताम् ।
चतुर्थपुष्पमपि पूर्णतामागतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu